# भारतीय शिक्षा बोर्ड
# आदर्श-प्रश्न-पत्रम् - अर्धवार्षिक परीक्षा
# संस्कृतम् - कक्षा 8
# सत्रम् - 2025-26

**निर्धारितसमयः** - होरात्रयम् **पूर्णांकाः** - 80

**निर्देश -**

- प्रश्नों को ध्यानपूर्वक पढ़ें ।
- प्रश्न पत्र को पढ़ने के लिए अतिरिक्त 15 मिनट का समय दिया गया है। इस दौरान छात्र केवल प्रश्न पत्र पढ़ेंगे ।
- प्रश्न पत्र में कुल 19 प्रश्न है और सभी प्रश्न अनिवार्य है ।
- इस प्रश्न पत्र में चार खण्ड हैं :
  - खण्ड - क : अपठित-अवबोधनम् - 10 अंक
  - खण्ड - ख : रचनात्मक-कार्यम् - 20 अंक
  - खण्ड - ग : अनुप्रयुक्तव्याकरणम् - 20 अंक
  - खण्ड - घ : पठित-अवबोधनम् - 30 अंक
- खण्ड - क : प्रश्न संख्या 1 के लिए 10 अंक निर्धारित किये गये है ।
- खण्ड - ख : प्रश्न संख्या 2, 3, 4 एवं 5 तक प्रत्येक प्रश्न के लिए 05 अंक निर्धारित किये गये है ।
- खण्ड - ग : प्रश्न संख्या 6, 7, 8 एवं 9 तक प्रत्येक प्रश्न के लिए 05 अंक निर्धारित किये गये है ।
- खण्ड - ग : प्रश्न संख्या 10, 11, 12, 13 एवं 14 तक प्रत्येक प्रश्न के लिए 04 अंक एवं प्रश्न संख्या 15, 16, 17, 18 एवं 19 तक प्रत्येक प्रश्न के लिए 02 अंक निर्धारित किये गये है ।

---

## 'क' भागः (अपठितावबोधनम्)

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** 10

भारते अनेकाः नद्यः वहन्ति। भारतस्य सर्वासु नदीषु यमुना अपि एका प्रमुखा नदी अस्ति। इयं हिमालयस्य 'यमुनोत्री' स्थानात् निर्गच्छति। प्रारम्भे अस्याः स्रोतः लघुः भवति, पश्चात् अनेके निर्झराः अस्यां नद्यां मिलन्ति, यैः यमुनायाः जलप्रवाहः तीव्रः भवति । उत्तरभारतस्य भूभागान् सिञ्चन्ती अनेकेषां नगराणां शोभां वर्धयन्ती एषा नदी प्रयागं गच्छति तत्र गङ्गा-सरस्वतीभ्यां सह मिलित्वा त्रिवेणीरूपं धारयति। भारतस्य राजधान्यां दिल्लीनगर्याम् एषा नदी वहति। परम् अद्यत्वे उद्योगानां प्रदूषितजलेन अवकरैः च अस्याः जलं प्रदूषितं भवति। प्रदूषितं जलं पीत्वा मानवाः अन्ये जीवाः च विविधैः रोगैः आक्रान्ताः भवन्ति। अतः अस्याः जलरक्षणाय जनाः कृतसङ्कल्पाः भवेयुः ।

(क) एकेन पदेन उत्तरयत- (केवलं प्रश्नद्वयम्) 1×2=2

1. का हिमालयस्य यमुनोत्रीस्थानात् निर्गच्छति ?
2. कीदृशं जलं पीत्वा मानवाः विविधैः रोगैः आक्रान्ताः भवन्ति ?
3. भारते अनेकाः काः वहन्ति ?

(ख) पूर्णवाक्येन उत्तरयत- (केवलं प्रश्नद्वयम् ) 2×2=4

1. यमुनायाः जलं कथं प्रदूषितं भवति ?
2. यमुनायाः जलप्रवाहः कथं तीव्रः भवति ?
3. जनाः कस्मै कृतसङ्कल्पाः भवेयुः?

(ग) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत - 1

(घ) निर्देशानुसारम् उत्तरयत - 1×3=3


(i) गद्यांशे 'जलम्' इति पदस्य विशेषणपदं किम् ?
(क) परम् (ख) प्रदूषितम् (ग) इयम् (घ) शोभाम्

(ii) 'भारते अनेकाः नद्यः वहन्ति।' अत्र क्रियापदं किम् अस्ति ?
(क) भारते (ख) अनेकाः (ग) नद्यः (घ) वहन्ति

(iii) 'यमुना एका प्रमुखा नदी अस्ति।' अत्र विशेष्यपदं किम् अस्ति ?
(क) नदी (ख) यमुना (ग) प्रमुखा (घ) नदी

## 'ख' भागः (रचनात्मक-कार्यम्)

2. चित्रं दृष्ट्वा पट्टीकायां पञ्च वाक्यानि संस्कृतेन लिखत। (1x5=5)



गृहम्, समाचारपत्रम्, बालकाः, बालिकाः, क्रीडन्ति, माता, पिता, पितामहः, पितामही, वृक्षाः, वार्तालापम्, आनन्दम्, मिलित्वा

अथवा

'मम प्रियो भारतदेशः' इति विषयम् अधिकृत्य संस्कृतेन पञ्च वाक्यानि लिखत।

3. अधोलिखितं संवादं पट्टिकायां प्रदत्तशब्दसहायतया पूरयित्वा पुनः लिखत - 1×5=5

- अहम् अपि विस्फोटकपदार्थान् न चालयिष्यामि।
- अद्य दीपावली उत्सवः अस्ति।
- अहम् अपि एवमेव करिष्यामि।
- परन्तु विस्फोटकपदार्थान् अपि चालयिष्यामि।
- किमर्थम् ?

सुखदा - सखि, किं जानासि अद्य कः उत्सवः अस्ति ?

नम्रता - (i) ________________।

सुखदा - अहं तु अद्य आपणात् नवीनवस्त्राणि मिष्टान्नं च क्रेष्यामि। त्वं किं करिष्यसि?

नम्रता - अहम् एतत् सर्वं तु करिष्यामि एव (ii) ________________।

सुखदा – अहं तु विस्फोटकपदार्थान् न चालयिष्यामि।

नम्रता - (iii) ________________?

सुखदा- यतः तेषां धूम्रेण ध्वनिना च प्रदूषणं प्रसरति ।

नम्रता - समीचीनं कथितम्। (iv) ________________।

सुखदा - बहु उत्तमम्, अहं सायं यज्ञं ततः सपरिवारं लक्ष्मीपूजनं च करिष्यामि।

नम्रता – (v) ________________।

4. अधोलिखितां कथां पट्टिकायां प्रदत्तशब्द-सहायतया पूरयित्वा पुनः लिखत- (½×10=5)

| व्याधम् , ग्रामे, भैरवः, दृष्ट्वा , अक्षिपत् ,सिंहम् , आखेटाय, मृगः ,धनम्, पशून् |
|---|

एकस्मिन् (i) ______________ एकः व्याधः वसति स्म। तस्य नाम (ii) ______________ आसीत्। सः जीविकार्थम् (iii) ______________ हत्वा नगरे विक्रीणाति स्म। एकदा सः (iv) ______________ वनम् अगच्छत्। तत्र तेन एकः (v) ______________ दृष्टः । सः तं मृगम् अमारयत्, तं च नीत्वा गृहं प्रति अचलत् । तदैव सः मार्गे एकं (vi) ______________ अपश्यत् । तं सिंहं (vii) ______________ सः अचिन्तयत् 'यदि एषः सिंहः अपि प्राप्तः भवेत् तर्हि अहं प्रभूतं (viii) ______________ प्राप्स्यामि'। अनेन लोभेन यावत् सः सिंहं प्रति शरम् (ix) ______________ तावत् एव सिंहः अपि (x) ______________आक्राम्यत् एवं सिंहेन सह व्याधः अपि पञ्चत्वं गतः।

5.

6. भवतः नाम रमेशः अस्ति । विद्यालयस्य प्रतियोगितासु भवता अनेकानि पदकानि जितानि। अस्मिन् विषये मित्रं प्रति लिखिते पत्रे पट्टिकातः पदानि विचित्य पत्रं पूरयित्वा पुनः लिखत। 5

| रोचते, पत्रं, अर्धवार्षिकीपरीक्षा, मार्गदर्शनेन, कुशलं, अनेकासु, प्रथमस्थानम्, प्रणामाः, छात्रावासतः, मित्रम् |
|---|

(i) ________________

भारतनगरम्

प्रिय मित्र !

नमो नमः ।

अत्र (ii) ______________ तत्रास्तु । अहं विद्यालयस्य प्रतियोगितासु अतिव्यस्तः आसम् । अतः विलम्बेन (iii) ______________ लिखामि । त्वं जानासि यत् धावनं क्रीडनं च मह्यं अतीव (iv) ______________ । अहम् (v) ______________ प्रतियोगितासु भागं गृहीतवान् । अहं धावन-प्रतियोगितायां (vi) ______________ प्राप्तवान् । इदानीं प्रतियोगिताः तु समाप्ताः । आगामिमासे एव मम (vii) ______________ भविष्यति । स्वशिक्षकाणाम् (viii) ______________ अहं सफलः भविष्यामि । तव पितृभ्यां मम (ix) ______________ निवेद्यन्ते ।

भवतः (X) ______________,

रमेशः

## 'ग' भागः (अनुप्रयुक्तव्याकरणम्)

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कुरुत।** 1×5=5

(i) <u>गीतोपदिष्टा</u> च जनार्दनेन।

(ii) बीजशेषमात्रम् <u>अपि+अत्र</u> न उद्धरिष्यति ।

(iii) अलिकम् अलिकं <u>खल्वेतत्</u> ।

(iv) <u>अभितः+तपोवनेन</u> भवितव्यम् ।

(v) हारम् आदाय <u>यथा+अभिलषितं</u> स्थानं गताः ।

**7. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत -** 1×5=5

**(i)** ______________ **चत्वारः पुत्राः आसन् ।**

(क) राजा (ख) राज्ञः (ग) राज्ञा (घ) राजनि

**(ii)** ______________ **आचार्यकुले पठामः ।**

(क) वयम् (ख) अहम् (ग) आवाम् (घ) यूयम्

**(iii)** ______________ **विश्वस्य माता अस्ति ।**

(क) गावः (ख) गवा (ग) गौः (घ) गाम्

**(iv) वैद्यः** ______________ **रोगं नाशयति ।**

(क) मधु (ख) मधुनः (ग) मधुनि (घ) मधुना

**(v) रुमण्वान्** ______________ **अमात्यो अस्ति ।**

(क) नामसु (ख) नामानि (ग) नामभिः (घ) नाम

**8. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं धातुरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत -** **1×5=5**

**(i) अन्तेवासिनः भोजनालये भोजनं ........................।**

(क) अत्स्यामि (ख) अत्स्यन्ति (ग) अत्स्यावः (घ) अत्स्यसि

**(ii) छात्राः रात्रौ ईश्वरं नत्वा ............................ ।**

(क) स्वप्यात् (ख) स्वप्याः (ग) स्वप्युः (घ) स्वप्याम्

**(iii) अवकाशानन्तरं विद्यालयं प्रति आगच्छन् बालाः ---------**

(क) अरुदन् (ख) अरोदत् (ग) अरोदम् (घ) अरोदः

**(iv) ब्रह्मचारिणः भोजनमत्रानन्तरम् अत्रं ------------ ।**

(क) अत्तु (ख) अदानि (ग) अदाव (घ) अदन्तु

**(v) त्वं किमर्थं फलानि न ---------- ।**

(क) अत्ति (ख) अत्सि (ग) अत्तः (घ) अदन्ति

**9. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययविभागं संयोजनं वा कुरुत -** **1×5=5**

(i) कृष्णसर्पः वृक्षविवरात् **निर् + गम् + ल्यप्** ____________ बालकान् भक्षयति ।

(ii) कुलीरकः अस्थिपर्वतं **अव +लोक् +ल्यप्** ____________ अपृच्छत् ।

(iii) सः **विहस्य** ____________ + ____________ + ____________ उवाच ।

(iv) राजा वृतान्तं **श्रुत्वा** ____________ + ____________ विषण्णः जातः ।

(v) सा कनकसूत्रं **गृहीत्वा** ____________ + ____________ कोटरे अक्षिपत् ।

## 'घ' भागः (पठितावबोधनम् )

**10. अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **4**

अस्ति कस्मिंश्चिद् वनप्रदेशे नानाजलचरसनाथं महत् सरः । तत्र च कृताश्रयो बक एको वृद्धभावम् उपागतो मत्स्यान् व्यापादयितुम् असमर्थः । ततश्च क्षुत्क्षामकण्ठः सरस्तीरे उपविष्टो मुक्ताफलप्रकारसदृशैः अश्रुप्रवाहैः धरातलम् अभिषिञ्चन् रुरोद। एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरम् इदम् ऊचे- माम ! किमद्य त्वया यथापूर्वम् आहारवृत्तिः नानुष्ठीयते ? केवलम् अश्रुपूर्णनेत्राभ्यां सनिःश्वासेन स्थीयते । स आह- वत्स ! सत्यम् उपलक्षितं भवता । मया हि मत्स्यादनं प्रति परमवैराग्यतया साम्प्रतं प्रायोपवेशनं कृतम् । तेनाहं समीपगतान् अपि मत्स्यान् न भक्षयामि । कुलीरकः तत् श्रुत्वा प्राह माम! किं तद् वैराग्यकारणम् ? स प्राह- वत्स! अहम् अस्मिन् सरसि जातः वृद्धिं गतश्च। तत् मया एतत् श्रुतं यद् द्वादशवार्षिकी अनावृष्टिः सम्पद्यते लग्ना ।

**क. एकेन पदेन उत्तरयत –** **(1x2=2)**

i) नानाजलचरसनाथं महत् सरः कुत्रासीत् ?

ii) केन आहारवृत्तिः नानुष्ठीयते ?

**ख. निर्देशानुसारम् उत्तरयत -** **(1x2=2)**

i) 'अहं समीपगतान् अपि मत्स्यान् न भक्षयामि।' अत्र कर्तृपदं किम् ?

ii) '**महत् सरः**' अत्र विशेष्यपदं किम् ?

**11. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं क्रियताम्।** **1×5=4**

(i) देवाः मिथः नो विद्विषते ।

(ii) **स्वाध्यायप्रवचनाभ्यां** न प्रमदितव्यम् ।

(iii) अहं परिश्रान्तः अस्मि ।

(iv) अयोध्यानगरी **सरयूतीरे** अस्ति ।

**12. 'अयोध्या नाम नगरी' पाठम् आधृत्य प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **4**

i) अयोध्यानगरी कस्याः नद्याः तीरे अस्ति ?

ii) रामायणस्य कर्ता कः ?

iii) दशरथः केन परिरक्षितः ?

iv) अयोध्यावासिनः नराः कैः तुष्टाः आसन् ?

**13. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितम् अर्थं चित्वा लिखत।** **1×4=4**

i. अन्यो अन्यस्मै **वल्गु** वदन्तः ।

(क) परस्परम् (ख) मधुरम् (ग) सम्यक् (घ) सह

ii. कामी वा न कदर्यो वा **नृशंसः** पुरुषः नासीत् ।

(क) क्रूरः (ख) हृष्टः (ग) दीर्घा (घ) कृपणः

iii. श्रिया देयम्। **ह्रिया** देयम्।

(क) लज्जया (ख) संशयः (ग) उपदेशः (घ) आनीय

iv. छात्राः **आचार्यानुशासनं** श्रावयन्ति ।

(क) उपदेशः (ख) वेदविदः (ग) वेदस्य रहस्यम् (घ) शिष्यम्

**14. पट्टिकायां प्रदत्तपदैः अधोलिखितां कथां पूरयित्वा पुनः लिखत -** ½×8 = 4

| |
|---|
| **श्रगालं, कृष्णसर्पः, कनकसूत्रम् , राजपुरुषाः, सर्पकोटरे, वायसदम्पती, बालकान् , न्यग्रोध-पादपः** |

अस्ति कस्मिंश्चित् प्रदेशे महान् (i) ____________ तत्र वायस-दम्पती प्रतिवसतः स्म। अथ तयोः प्रसवकाले वृक्षविवरात् निष्क्रम्य (ii) ____________ सदा एव तदपत्यानि भक्षयति। ततः तौ निर्वेदात् अन्यवृक्षमूलनिवासिनं प्रियसुहृदं (iii) ____________ गत्वा ऊचतुः - एष दुष्टात्मा कृष्णसर्पः वृक्षविवरात् निर्गत्य आवयोः (iv) ____________ भक्षयति। श्रगालः आह - भद्र ! भवान् कस्यापि धनिनः राजामात्यादेः प्रमादिनः (v) ____________ हारं वा गृहीत्वा तत्कोटरे प्रक्षिप। काकी राज्ञः कनकसूत्रं आदाय (vi) ____________ अक्षिपत् । (vii) ____________ कोटरे कृष्णसर्पं वीक्ष्य तस्य वधम् अकुर्वन्। (viii) ____________ अपि ततः परं सुखेन वसतः।

**15. पट्टिकातः यथायोगं पर्यायपदानि विचित्य योजयत** 1/2×4=2

| |
|---|
| **नगरी, शरीरम्, ब्रवीतु, धनम्** |

(क) वदतु ____________________

(ख) वपुः ____________________

(ग) पुरी ____________________

(घ) वसु ____________________

**16. अधोलिखितानां पदानां विलोमपदानि योजयत** 1/2×4=2

| |
|---|
| **अवध्या, पुण्यम् , अमृतम् ,सायम्** |

(क) विषम् ____________________

(ख) वध्या ____________________

(ग) प्रातः ____________________

(घ) पापम् ____________________

**17. अधोलिखितानि विशेषणानि विशेष्यैः सह योजयत -** 1/2×4=2

| | |
|---|---|
| (क) पुत्रः | **स्फीतः** |
| (ख) जनपदः | **दुष्टात्मा** |
| (ग) कृष्णसर्पः | **गुणवान्** |
| (घ) राजा | **अनुव्रतः** |

18. पट्टिकातः समुचितपदानि चित्वा अधोलिखितस्य श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत- 1/2×4=2

| मनुना, कोशलो, अयोध्या, जनपदः , |
|---|

कोशलो नाम मुदितः जनपदो महान् । निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ।।
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता । मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ।।

अन्वयः - सरयूतीरे (i) ________ नाम मुदितः स्फीतः **प्रभूतधनधान्यवान् महान्** (ii) ______ निविष्टः। तत्र **लोकविश्रुता** (iii) ________ नाम नगरी आसीत् या पुरी **मानवेन्द्रेण** (iv) ________ निर्मिता आसीत् ।

19. अधोलिखितश्लोकस्य भावार्थं पूरयित्वा पुनः लिखत - 1/2×4=2

| मात्रा, पत्ये, वाचं, पितुः |
|---|

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ।।

भावार्थः - पुत्रः (i) _______ अनुव्रतः भवतु, (ii) _______संमना भवतु ।
जाया (iii) ______ मधुमातीं शन्तिवाम् (iv) ______ भवतु ।।